३कुन्दुरुके पु० राजनि० ४कांस्ये न० ५तुवर्य्यां स्त्री राजनि० टाप् । सुगन्धिमृत्तिकाभेदे स्त्री रत्नमा० ङीप् संज्ञायां कन् । सौराष्ट्रक पञ्चलौहे न० हेमच० ।

**सौराष्ट्रिक** न० सुराष्ट्रदेशे भवः ठक् । विषभेदे शब्दर० ।

**सौरि** पु० सूरस्यापत्यम् इञ् । १शनैश्वरे "सौरिवारेऽष्टता-नीति" ज्यो०त० । २यमे ३कर्णे ४सुग्रीवे च पु० । ५असन-वृक्षे ६आदित्यभक्तायां राजनि० ।

**सौरिक** पु० सुराणां देवानामधिवासाय हितः ठक् । १स्वर्गे स्वार्थे क । २सूर्य्यापत्ये शनैश्वरादौ ।

**सौरिरत्न** न० सौरिप्रियं रत्नम् शाक० । नीलके मणौ राजनि०

**सौरेय** पु० सुरायै हितम् ढक् । शुक्लझिण्टाम् स्वार्थे क तत्रैव । "सौरेयः कुष्ठवातास्रकफकण्डुविषापहः । तिक्तोष्णो मधुरो दन्त्यः सुस्निग्धः केशरञ्जनः" भावप्र० ।

**सौल्विक** त्रि० सुल्वं ताम्रपात्रादिनिर्माणं शिल्पमस्य ठक् । ताम्रमयपात्रनिर्माणकर्त्तरि (कासारि) । वणिग्भेदे

**सौव** त्रि० स्वस्येदम् स्वरो इदम् वा अण् अव्ययटिलोपो न वृद्धिः वात्पूर्वमौत् । १आत्मसम्बन्धिनि २स्वर्गसम्बन्धिनि ।

**सौवग्रामिक** त्रि० स्वग्रामे भवः ठक् न वृद्धिः वात्पूर्व मौत् । स्वग्रामभवे पदार्थे ।

**सौवर्चल** पु० सुवर्चलदेशे भवम् अण् । लवणभेदे अमरः ।

**सौवर्णभेदिनी** स्त्री सुवर्णस्य विकारः अण् सौवर्णमिव भिनत्ति प्रकाशते भिद–णिनि । प्रियङ्गौ शब्दमा० ।

**सौवस्तिक** पु० स्वस्तिकरणे कुशलः ठक् न वृद्धिः वात्पूर्व मौत् । पुरोहिते हेमच० । [रक्षके अमरः ।

**सौविद** पु० सुवेत्ति सु+विद–क स्वार्थेऽण् । अन्तःपुर-

**सौविदल्ल** पु० सुष्ठु विदन् नृपः तं लाति ला–क स्वार्थेऽण् । अन्तःपुररक्षके अमरः ।

**सौवीर** न० सुष्ठु वीरो यत्र सुवीरो देशभेदः तत्र भवम् अण् । १स्रोतोऽञ्जने २बदरफले "सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम् । गोधूमैरपि सौवीरम्" इत्या-द्युक्ते ३काञ्जिके अमरः "सौवीरन्तु ग्रहण्यर्शः कफघ्नं भेदि दीपनम् । उदावर्त्ताङ्गमर्द्दास्थिशूलानाहेषु शस्यते" भावप्र० । बदरवृक्षे पु० राजनि० ।

**सौवीरसार** पुंन० कर्म० । स्रोतोऽञ्जने राजनि० ।

**सौवीराञ्जन** न० सौवीराख्यमञ्जनम् । अञ्जनभेदे अमरः स्वार्थे क । काञ्जिकभेदे न० ।

**सौष्ठव** न० सुष्ठु भद्रं तस्य भावः अण् न टिलोपः । आति-शय्ये "स सौष्ठवौदार्य्यविशेषशालिनीम्" किरा० ।

**सौहार्द** न० सुहृदो भावः अण् द्विपदवृद्धिः । १स्नेहे २मित्रत्वे हेमच० । ["सौहित्यमाचरेत्" स्मृतिः ।

**सौहित्य** न० सुहितस्य तृप्तस्य भावः ष्यञ् । तृप्तौ "नाति-

**सौहृद** न० सुहृदो भावः अण् । मित्रत्वे बन्धुतायाम् हेम०

**स्कद** उत्प्लुत्य गतौ अक० उद्धृतौ आप्लावे च सक० भ्वा० आ० सेट् इदित् । स्कन्दते अस्कन्दिष्ट । [स्कन्दत् त ।

**स्कन्द** समाहारे अद०चु०उभ०सक०सेट् । स्कन्दयति ते अच-

**स्कन्द** गतौ शोषणे च भ्वा० पर० सक० अनिट् । स्कन्दति इरित् अस्कदत् अस्कान्त्सीत् चस्कन्द । आ+आक्रमणे

**स्कन्द** पु० स्कन्दते उत्प्लुत्य गच्छति अच् । कार्त्तिकेये अमरः अग्निकुमारशब्दे ५४ पृ० तस्योत्पत्तिरुक्ता । स्कन्दग्रह-स्कन्दापस्मारौ ग्रहशब्दे २७४५ पृ० सुश्रुतोक्तौ दर्शितौ । २नृपतौ जटा० ३देहे त्रिका० ४पारदे राजनि० ५बाल-ग्रहभेदे सुश्रुतः । [४शोषणे च ।

**स्कन्दन** न० स्कन्द–ल्युट् । १रेचने त्रिका० २क्षरणे ३गतौ

**स्कन्दांशक** पु० स्कन्दस्यांश एवांशो यस्य कप् । पारदे । तयोः शिववीर्य्यजत्वादेकांशत्वम् ।

**स्कन्ध** पु० स्कन्द्यते आरुह्यतेऽसौ सुखेन शाखया वा कर्म्मणि घञ् पृषो० । १अंसे (कांध) २वृक्षस्य काण्डे (गुँड़ि) अमरः । ३नृपे ४युद्धे ५समूहे ६काये ७भद्रादौ ८छन्दो-भेदे मेदि० सौगतमतसिद्धेषु ९विज्ञानादिषु पञ्चस्कन्धेषु "मुक्ताङ्गस्कन्धपञ्चकम्" माघः । १०पथि शब्दर० ११ग्रन्थ-परिच्छेदे च । "स्कन्धैर्द्वादशभिर्युक्तम्" इति भागवत-विशेषणम् । १२व्यूहे हेमच० । [विहङ्गिकायां हारा० ।

**स्कन्धचाप** पु० स्कन्धे चाप इव । वंशादिनिर्मितशिक्याधारे

**स्कन्धज** पु० स्कन्धात् जायते जन–ड । स्कन्धारूढे सल्लक्यादौ "पर्वयोनय इक्ष्वाद्याः स्कन्धजाः सल्लकीमुखाः" हेमच० ।

**स्कन्धतरु** पु० स्कन्धप्रधानः तरुः । नारिकेलवृक्षे राजनि० ।

**स्कन्धफल** पु० स्कन्धे फलमस्य । १नारिकेलवृक्षे राजनि० । २उडुम्बरवृक्षे च शब्दच० । [शब्दच० ।

**स्कन्धबन्धना** स्त्री स्कन्धे बन्धनमिवास्याः । मधुरिकायाम्

**स्कन्धरुह** पु० स्कन्धात् रोहति रुह–क । वटवृक्षे राजनि० ।

**स्कन्धवाह** पु० स्कन्धेन वाहयति वह–णिच्–अच् । स्कन्धेन शकटादिवाहके वृषादौ हारा० ण्वुल् । स्कन्धवाहक तत्रैव हेमच० । [शाखायाम् अमरः ।

**स्कन्धशाखा** स्त्री स्कन्धात् पर्य्यति शाखा । वृक्षस्य प्रधान-

**स्कन्धशृङ्ग** पुंस्त्री० स्कन्धपर्य्यन्तं शृङ्गमस्य । महिषे स्त्रियां ङीप् ।